Postal Regd.No. GAMC- 1553/2025-2027 ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : २० अङ्कः : २३१
जुलाई - २०२५

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2025-2027 issued by SSP Ahmedabad. Valid upto 31-12-2027. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### मनस्वी महात्मा

१९८१ तमे वर्षे रिचार्ड एटेनबरो–नामा ब्रिटनदेशीयः दिग्दर्शकः 'गान्धी' चलचित्रं निर्मितवान्। अनेन अष्ट 'ओस्कार एवोर्ड्स' प्राप्तानि। चलचित्रं मनोहरम् एव, परं स्वयं गान्धिवर्यस्य चलचित्रं प्रति अभिप्रायः कथम् आसीत् इत्यपि सकुतूहलं जिज्ञासितव्यं ननु। इतिहासस्य कानिचन पत्राणि अवलोकयामः तावत्।

दीर्घायुः गान्धिवर्यः केवलानि त्रीणि चलचित्राणि दृष्टवान् इति ज्ञानमात्रेण तर्कयितुं शक्यते यत् महात्मनः रुचिः कस्मिन् स्तरे स्यात्! आफ्रिकादेशे पूर्णानि २१ वर्षाणि वसन् महात्मा एकमेव मूकं (ध्वनिरहितम्) चलचित्रं दृष्ट्वा साभिप्रायं सूचयति – 'एतस्य अपेक्षया अस्मदीयाः (भारतीयाः) ग्राम्याः नटाः सम्यक् अभिनयन्ति। अस्माकं नटाः एव भावगम्भीरं प्रस्तोतुं शक्नुवन्ति।' महात्मा एकेन प्रहारेण चलचित्रं चूर्णयाञ्चकार!

अस्तं गतेषु मूकचलचित्रेषु, भारते अपि कानिचन वाचालानि चलचित्राणि निर्मितानि। तदा केचन उत्सुकाः सेवकाः महात्मने निवेदितवन्तः – 'इदानीं तु चलचित्रेषु ध्वनेः अपि संयोगः अभवत्। भवता निश्चयेन दृष्टव्यम्।' तदा महात्मा विलक्षणम् उत्तरं वदति – 'नाटकेषु वर्तमानान् सजीवान् मनुष्यान् तिरस्कृत्य, चित्रपटेषु निर्जीवान् मनुष्यान् पश्यन् अहं किमर्थं समयं नाशयेयम्?' महात्मा सेवकानां तेजोमयम् औत्सुक्यम्, क्षणेन निष्प्रभं चकार।

वर्षाणि व्यतीतानि। स्वातन्त्र्यसङ्ग्रामे अस्वस्थस्य गान्धिवर्यस्य विश्रामः आवश्यकः आसीत्। जहांगीरः पटेलः तस्य निवासं जूहु–समुद्रतटे कल्पितवान्। सः महात्मनः मनोरञ्जनार्थम् आधुनिकैः यन्त्रैः (रशियादेशे निर्मितं) 'मिशन टु मोस्को' नामकं चलचित्रम् आयोजितवान्। चलचित्रं दृष्ट्वा महात्मा स्वभावम् अनुसरन् वदति – 'अस्मिन् चलचित्रे रशियादेशस्य युवतीनां गात्रेषु अतीव संश्लिष्टानि यानि वस्त्राणि आसन्, तानि उद्वेगं जनयन्ति!' पटेलवर्यस्य उष्णः उत्साहः, महात्मनः एकेन वाक्येन शीतलतां गतः। महात्मनः आराधने भग्नमनोरथः सः, अपरं 'निष्कलङ्कम्' चलचित्रम् अन्वेष्टुं मतिं चकार।

अथ कदाचित् झवेरचन्दः मेघाणी सूचितवान् यत् विश्रामकाले मनोरञ्जनार्थं गान्धिवर्येण 'रामराज्य' चलचित्रं दृष्टव्यम्। चलचित्रस्य दिग्दर्शकः (निर्माता च) विजयः भट्टः अपि अत्र अभिलाषुकः आसीत्। महात्मा तत् चलचित्रम् अवलोक्य सेवकेषु अभिप्रायं वितरति – 'रामः रामः इव न आसीत्, सीता च सीता इव न आसीत्। मम कल्पनायां रामः एवंविधः न वर्तते।' अभिप्रायेण किञ्चित् क्षुभितमनाः इव सेवकगणः वदति– 'परन्तु महात्मन्! अनेन चलचित्रेण लक्षशः जनाः मोहिताः।' महात्मा उवाच – 'जनता यदि एनं रामं बहुमन्यते तर्हि एतस्य राष्ट्रस्य भविष्यं तमोमयम् एव इति चिन्तनीयम्।' चलचित्रे सफलः नायकः प्रेक्षकरूपेण नितरां विफलः सन् अपि अस्माकं महात्मा, 'गान्धी' आसीत् इति नैव विस्मरणीयम्!

# धैर्ये साहसे च लक्ष्मीः

यथापूर्वं रात्रेः भोजनस्य अनन्तरं सर्वे बालाः पितामहीम् अभितः उपविष्टाः कथां श्रोतुम्। पितामही कथां वक्तुम् उद्युक्ता। तावता नागराजनामकः सूर्यं दर्शयन् पितामहीम् अवदत् – "एषः शालासमयात् पूर्वमेव गृहम् आगतः। अस्य कारणं भवती जानाति किम् ? कोऽपि सुन्दरनामकस्य बालकस्य लेखनीं चोरितवान्। सुन्दरः अध्यापकम् उक्तवान् – 'मम लेखनी नष्टा' इति। तदा अध्यापकः सर्वेषां बालकानां स्यूतान् परिशीलयितुम् आज्ञापितवान्। एषः सूर्यः स्वस्यूते हस्तं यदा स्थापितवान् तदा लेखनीसदृशं किञ्चन वस्तु हस्ते लग्नम्। भीतः सन् एषः शालातः पलायितवान्। गोपीनामकः बालः सुन्दरस्य लेखनीं चोरयित्वा अस्य स्यूते स्थापितवान् आसीत् इति श्रूयते" इति।

पितामही सूर्यं पश्यन्ती उक्तवती – "वत्स, सूर्य ! भवता लेखनी न स्वीकृता। तथापि किमर्थं ततः धावितम् ?" इति। तदा सूर्यः उक्तवान् – "पितामहि ! मम भयम् आसीत् यत् सर्वे मामेव चोरं भावयेयुः" इति। "बुद्धिमतां नीतिवाक्यम् अस्ति यत् धैर्ये साहसे च निवसति लक्ष्मीः इति। एतं विषयम् एव अद्यतनकथायां श्रावयिष्यामि। श्रद्धया शृणवन्तु" इति कथयन्ती पितामही कथायाः आरम्भं कृतवती। पुरा प्रवृत्ता घटना एषा। श्रीधरः विमलः चेति उभौ छात्रौ गुरुकुले पठन्तौ आस्ताम्। तौ न महाबुद्धिमन्तौ। किन्तु विनयशीलता तु तयोः विशेषः आसीत्। अतः गुरुः तयोः बहुधा प्रीतिमान् आसीत्।

तयोः विद्याभ्यासस्य समाप्तिः यदा जाता तदा तौ गुरुकुलात् प्रस्थितौ। तौ उद्दिश्य गुरुः अवदत् – पुत्रौ ! पूर्वं कदाचित् कस्यचन महाराजस्य महती कष्टपरम्परा आपतिता। तस्य सर्वस्वमपि नष्टम्। बहुकालपर्यन्तं याः अष्टौ लक्ष्म्यः तेन सह अवसन् ताः इदानीं क्रमशः तं त्यक्त्वा गन्तुम् उद्युक्ताः।

धनलक्ष्मीः, धान्यलक्ष्मीः, विजयलक्ष्मीः इत्यादयः सप्त लक्ष्म्यः अपि महाराजं त्यक्त्वा गताः। अनेन महाराजः न खिन्नः। किन्तु यदा अन्ते धैर्यलक्ष्मीः अपि तं त्यक्तुं सिद्धा तदा तां महाराजः अवदत् – 'अम्ब ! अन्याः मां त्यक्त्वा गताः। तेन अहं न निर्विण्णः। किन्तु भवतीं विना अहं स्थातुम् अशक्तः। भवती एका मया सह तिष्ठति चेत् पर्याप्तम्। अहं विश्वसिमि यत् भवत्याः अनुग्रहः यदि मयि भविष्यति तर्हि इतः पूर्वं गतं सर्वमति अहं पुनः प्राप्नुयाम्' इति।

राज्ञः एतेन वचनेन धैर्यलक्ष्म्याः हृदयं दयापूर्णम् अभवत्। सा राजानम् आश्वासयन्ती उक्तवती – 'पुत्र ! अहं सर्वदा भवता सह निवत्स्यामि' इति। धैर्यलक्ष्म्याः साहाय्येन सः महाराजः प्रणष्टं सर्वमपि पुनः प्राप्तवान्। अतः एव प्राज्ञाः कथयन्ति यत् धैर्ये साहसे च लक्ष्मीः प्रतिवसति इति।

मनुष्येण विपदि धैर्यम् आश्रयणीयम्। अतः भवन्तौ उभौ अपि कष्टमय्यां परिस्थितौ अपि धैर्यं न त्यजेताम्। एवं चेत् अग्रे भवतोः भविष्यं सुन्दरं भविष्यति" इति तौ आशिषा अनुगृह्य प्रेषितवान्। श्रीधरः विमलः च गुरोः आशिषं प्राप्य सन्तुष्टौ सन्तौ गुरुकुलात् राजधानीं प्रति प्रस्थितौ।

राजधान्याः सीमा यावत् प्राप्ता तावता सर्वत्र तमः प्रसृतम् आसीत्। किञ्चिद्दूरम् अग्रे गताभ्यां ताभ्यां काचन धर्मशाला प्राप्ता। धर्मशालायां वसतिं भोजनं च तौ प्राप्तवन्तौ। तदर्थं धर्मशालायाः स्वामी ताभ्याम् एकैकं सुवर्णनाणकं स्वीकृतवान्। मध्यरात्रसमयः। तदा धर्मशालायाम् महान् कोलाहलः अकस्मात् उत्पन्नः। श्रीधरः विमलः च निद्रातः उत्थितौ। श्रीधरः पार्श्वे स्थितं कञ्चन पृष्टवान् – "किम् अभवत् ? कोलाहलस्य कारणं किम् ?" इति। "राज्ञः अन्तःपुरे चौर्यं कृतवान् कश्चन चोरः अत्र आगतः इति वार्ता। अतः राजभटाः सर्वान् विचारयन्तः सन्ति" इति उक्तवान् सः।

'अस्मिन् विषये आवयोः तु भयं किमपि नास्ति' इति विचिन्त्य तौ निश्चिन्तौ जातौ। क्षणाभ्यन्तरे सैनिकाः सर्वत्र परिशीलनं कुर्वन्तः श्रीधरस्य स्यूतम् अपि परिशीलितवन्तः। तत्र नवरत्नखचितं कण्ठहारद्वयं ते लब्धवन्तः। एतत् दृष्ट्वा श्रीधरः विमलः च नितराम् आश्चर्यचकितौ जातौ।

सैनिकाः उभावपि निगृह्य उक्तवन्तौ ''एतत् कण्ठहारद्वयम् अपि महाराज्ञ्याः। हारद्वयम् अपि भवतोः स्यूते आसीत् इत्यतः स्पष्टं यत् भवन्तौ एव चोरौ इति। अन्ये कति जनाः भवत्समूहे सन्ति ? वदताम्'' इति।

एतत् श्रुत्वा तौ उभावपि नितरां भीतौ। श्रीधरः एव धैर्यं धरन् उक्तवान् – ''आवां न चोरौ। निद्रायां मग्नस्य मम स्यूते चोरः एतत् आभरणं स्थापितवान् स्यात्'' इति।

किन्तु सैनिकाः तस्य वचनम् अङ्गीकर्तुं न सिद्धाः। अतः तौ उभावपि ताडयितुम् उद्युक्ताः ते। विमलः तेभ्यः सैनिकेभ्यः कथमपि विमुक्तः सन् ततः पलायनं कृतवान्। सैनिकाः श्रीधरस्य बन्धनं कृत्वा राज्ञः सम्मुखं तं नीतवन्तः।

राजा यशोवत्सिंहः महाप्राज्ञः आसीत्। अतः सः श्रीधरेण उक्तं सर्वमपि शान्तचित्ततया श्रुत्वा उक्तवान् – ''भवतः कथनं सत्यम् इत्येव चिन्तयाम। तथापि कश्चन प्रश्नः अत्र उदेति यत् यदि भवन्तौ निरपराधौ तर्हि भवतः सखा किमर्थं पलायितवान् इति। एतस्य उत्तरं किं भवतः ?'' इति।

राज्ञः प्रश्नस्य उत्तरं यच्छन् श्रीधरः गुरुकुलात् प्रस्थानसमये गुरोः उपदेशं सविस्तरं श्रावयित्वा उक्तवान् – 'महाराज, ममापि बन्धनं स्यात् इति मम सुहृत् भीतः स्यात्। तदर्थमेव सः पलायितवान्। स तु निर्दोषः एव। अहमपि शपथं कृत्वा वदामि यत् यदि भवान् मां बन्धनात् विमुक्तं करिष्यति तर्हि येन वस्तुतः चौर्यं कृतं, तं चोरम् अन्विष्य अहं भवदधीनं करिष्यामि। मया सह यङ्कमपि प्रेषयितुम् अपि अर्हति भवान्'' इति।

राजा श्रीधरस्य वचने विश्वस्य तस्य विचारम् अङ्गीकृतवान्। अतः तेन उक्तम् – ''अस्तु ! आसायं भवान् निवसतु अत्र। ततः मदीयः कश्चन भवता सह आगमिष्यति'' इति।

सायं शेखरनामकः कश्चन श्रीधरेण सह गन्तुं सिद्धः सन् आगतः। श्रीधरः तेन सह गच्छन् स्वसन्देहं प्रकटितवान् – ''यस्यां धर्मशालायाम् आवां वासं कृतवन्तौ तस्याः स्वामिनः विषये एव मम सन्देहः। सः एव चोराणां साहाय्यं कुर्वन् तेभ्यः धनमपि स्वीकृतवान् स्यात्'' इति। ततः सः स्वेन चिन्तितम् उपायम् शेखरम् उक्तवान्।

ततः उभावपि विपणिं गत्वा कानिचन वस्तूनि क्रीतवन्तौ। तैः वस्तुभिः सह तामेव धर्मशालां गत्वा प्रकोष्ठं भाटकार्थं स्वीकृत्य तत्र उषितवन्तौ। श्रीधरः वेषपरिवर्तनं कृतवान् आसीत् इति कारणात् धर्मशालास्वामी तस्य परिचयं न प्राप्तवान्। उभौ अपि स्यूते स्थितानि कृतकानि आभरणानि निष्कास्य वणिजौ इव व्यवहरतः स्म।

रात्रेः भोजनस्य अनन्तरं श्रीधरशेखरौ गाढनिद्रायां मग्नौ इव सुप्तवन्तौ। मध्यरात्रसमयः। धर्मशालायां नूतनजनानाम् आगमनेन कोलाहलः श्रुतः। धर्मशालायाः स्वामी क्षीणस्वरेण वार्तालापं कुर्वन् दृष्टः श्रीधरशेखराभ्याम्। तस्मात् तौ ज्ञातवन्तौ यत् आवयोः विषयम् आगतान् वदन् अस्ति एषः इति। ततः तौ निश्चिन्तौ सन्तौ निद्रायां लीनौ जातौ। प्रातः उत्थाय तौ ततः प्रस्थितौ। धर्मशाला राज्यस्य सीमायाम् आसीत् इति कारणात् तत्र जनसञ्चारः विरलः एव। श्रीधरः शेखरश्च किञ्चिद्दूरं गतौ। तावता त्रयः चोराः तौ आक्रान्तवन्तः। एवं भवेत् इति ऊहा उभयोरपि आसीत् इति कारणात् तावपि तान् प्रतिरोद्धुं सिद्धौ एव। तौ मुष्ट्योः स्थितं मरीचिकाचूर्णं तेषां चोराणां मुखेषु प्रक्षिप्तवन्तौ। अनन्तरक्षणे स प्रदेशः चोराणां हाहाकाररवेण पूर्णः।

श्रीधरः झटिति स्यूते स्थितां रज्जुं निष्कास्य शेखरस्य साहाय्येन तान् चोरान् बद्धवान्। ततः धर्मशालास्वामिनमपि बद्ध्वा तमपि चोरैः सह राज्ञः समीपं तौ नीतवन्तौ। राजा तेभ्यः कठिनकारागृहवासं विहितवान्।

एवं पितामही कथां समाप्य हसन्ती उक्तवती – ''बालाः ! साहसी श्रीधरः कीदृशं जयं लब्धवान् इति ज्ञातवन्तः खलु भवन्तः ? श्रीधरेण सह आगतः शेखरः नान्यः, अपि तु स्वयं युवराजः एव। ततः परं शेखरः पितुः समीपे श्रीधरस्य बुद्धिमत्तां बहुधा प्रशस्य तं स्वस्य आप्तसहायकत्वेन नियोजितवान्। पलायितं विमलम् अन्विष्य राजसभाम् आनायितवान्। इदानीं वदन्तु – अनया कथया कीदृशी नीतिः प्राप्ता भवद्भिः ?'' इति।

सर्वे बालाः करताडनं कुर्वन्तः उच्चैः उक्तवन्तः – ''धैर्ये साहसे च लक्ष्मीः प्रतिवसति'' इति।

## प्रतिज्ञायौगन्धरायणम् ( ग्रन्थपरिचयः )

✍ व्योम शाहः

यस्य कृतिसमुद्रे निमज्जन्तोऽपि कतयः आनन्दिताः भवन्ति, तस्यैव महाकविभासस्य नाटकचक्रस्य अन्यतमं प्रतिज्ञायौगन्धरायणं नाम आस्वादामहे।

**कृतिप्रकारः**– इदं रूपकं 'प्रकरणम्' इति प्रकारेऽन्तर्भवति।

साहित्यदर्पणे प्रकरणस्य स्वरूपम् इत्थं वर्णितम् –

**''भवेत् प्रकरणं वृत्तं लौकिकं कविकल्पितम्। शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक्॥**
**सापायधर्मकामार्थपरो धीरप्रशान्तकः। नायिका कुलजा क्वाऽपि क्वाऽपि वेश्याद्वयं क्वचित्॥**
**तेन भेदास्त्रयस्तस्य तत्र भेदस्तृतीयकः। कितवद्यूतकारादिविटचेटकसङ्कुलः॥''**

अत्र वत्सराजः नायकः वासवदत्ता च नायिका। अत्र मुख्यः रसः वीरः।

**रूपकस्य आधारसामग्री** – उदयनकथा गुणाढ्यविरचितायां बृहत्कथायां प्राप्यते स्म किन्तु अद्य स ग्रन्थः नोपलभ्यते।

**कृतेरभिधानम्** – प्रतिज्ञायौगन्धरायणम् इति नाम प्रकरणस्य मुख्यं विषयम् अधिकृत्य स्थापितम्। प्रकरणेऽस्मिन् अमात्यः यौगन्धरायणः भर्तारम् उदयनं वासवदत्तां च मोचयितुं प्रतिज्ञां करोति परिपूरयति च। 'प्रतिज्ञानाटिका' इत्यपि अपरम् अभिधानम् अस्य हस्तप्रत्यादिषु प्राप्यते।

**प्रकरणसारः** – नान्द्यन्ते सूत्रधारः प्रविश्य इष्टदेवतां प्रणमति स्तौति च –

**''पातु वासवदत्तायो महासेनोऽतिवीर्यवान्। वत्सराजस्तु नाम्ना सशक्तिर्यौगन्धरायणः॥''**

**पीठिका** – कौशाम्बीनरेशः उदयनः सङ्गीतशास्त्रे प्रवीणः हस्तिनां मृगया च तस्मै रोचते। अवन्तीनरेशः प्रद्योतनामा महासेनः इत्यपराभिधः स्वीयां पुत्रीं वासवदत्तां तेन सह परिणायितुम् इच्छति स्म। तदर्थं महासेनेन एकः प्रपञ्चः योजितः। कदाचिद् उदयनः मृगयार्थं वनं गतः। महासेनस्य विषये यौगन्धरायणेन ज्ञातं स च राजानं पूर्वं प्रबोधयितुम् इच्छति स्म।

**प्रकरणम्** – सालकः यौगन्धरायणश्च मञ्चं प्रविशतः। यौगन्धरायणः गन्तव्यस्य महतः मार्गस्य वर्णनं सालकस्य पुरतः करोति। विजया लेखार्थं प्रतिसरार्थं च आदिष्टा। ततः निर्मुण्डकः प्रविश्य हंसकस्य आगमनं निवेदयति। हंसकः वत्सराजस्य सहचरः एकाकी आगतः इति श्रुत्वा यौगन्धरायणः संभ्रान्तः। हंसकः प्रविश्य प्रद्योतेन कृतं प्रपञ्चं सविस्तरं न्यवेदयत्।

प्रद्योतस्य प्रपञ्चेन वत्सराजेन घोषवती वीणा परित्यक्ता एकाकी एव च तदीयसैन्येन सह अयुध्यत्। मूर्च्छितं सैनिकैश्च अपमानितं तं हन्तुं यदा कश्चिदुस उदयच्छत् तदैव शालङ्कायनः नाम प्रद्योतस्य अमात्यः तं न्यवारयत्। ततः तं मुक्त्वा सादरम् उज्जयिनीं नगरीम् अनयत्।

तदैव प्रतिसरार्थं विजया प्रविष्टा। इमं वृत्तान्तं भर्तृमात्रं निवेदयितुं सः विजयाम् आदिशत्। ततः पुनरागतया विजयया निवेदितः सन् भर्तृमातुः सन्देशः – यौगन्धरायणोऽपि मम पुत्रः। सः एव मम पुत्रं प्रत्यानेतुं गच्छेत्। ततः कश्चिद् ब्राह्मणः समागत्य राजपरिवाराय आशिषः प्रदाय निर्गतः। भर्तृमाता पुत्रं यौगन्धरायणम् आह्वयत्। सः प्रस्थितः।

अङ्कस्य समाप्तिः अनेन श्लोकेन भवति –


**काष्ठादग्निर्जायते मथ्यमानाद् भूमिस्तोयं खन्यमाना ददाति।**
**सोत्साहानां नास्त्यसाध्यं नराणां मार्गारब्धाः सर्वयत्नाः फलन्ति॥**


( क्रमशः... )

# मासवार्त्ताः

**आरब्धः "Value Education through Sanskrit" बालसंस्कृतवर्गः इति अभ्यासक्रमः।**










बालकाः संस्कृतभाषायाः माध्यमेन भारतीयसंस्कृतेः परिचयं प्राप्नुयुः इति लक्ष्यीकृत्य एकलव्य-संस्कृत-एकेडेमीसंस्थानेन "Value Education through Sanskrit" बालसंस्कृतवर्गः इति अभ्यासक्रमः सञ्चाल्यते। अभ्यासक्रमेऽस्मिन् Skg तः ९ कक्ष्यायाः छात्राणां कृते संस्कृतपाठनस्य उत्तमा व्यवस्था कल्पितास्ति। एतेन अभ्यासक्रमेण बालेषु विविधाः क्षमताः तद्यथा उच्चारणशुद्धिः, स्मरणशक्तेः विकासः, व्यक्तिविकासश्च वर्धिष्यन्ते। अत्र उल्लेखनीयं यत् बालैः सह तेषां पोषकाणां कृते अपि संस्कृताध्यापनस्य व्यवस्था संस्थानेन कल्पितास्ति। एकलव्य-संस्कृत-एकेडेमी, गान्धिनगरकेन्द्रे अपि जुनमासस्य २८ दिनाङ्कतः बालवर्गाः संस्कृतभाषाशिक्षणवर्गाः च आरब्धाः वर्तन्ते उभयोः केन्द्रयोः आहत्य ७० छात्राः संस्कृताध्यनस्य आरम्भम् अकुर्वन्। श्रीमती सङ्गीता मिस्त्री, श्रीमती अमी गोहेलः, श्रीपारुलः व्यासः, श्रीरागिणी गोवाडिया, श्रीदीशा परमारः, श्रीश्यामः पटेलः, श्रीमती ओजसी सुखटङ्करः च छात्रान् पाठयिष्यन्ति। अभ्यासक्रमोऽयं मार्चमासपर्यन्तं प्रवर्तिष्यते।

## कृपया हसन्तु

शिक्षक:- (नमनं प्रति) एकस्मिन् कण्डोले १० आम्रफलानि सन्ति । तेषु द्वयो: आम्रफलयो: कीटा: प्राविशन् अत: द्वे आम्रफले नष्टे। अधुना कथय कति आम्रफलानि अवशिष्टानि ?

नमन: - महोदय, दश आम्रफलानि ।

शिक्षक:- कथम् ?

नमन: - भवतु द्वयो: आम्रफलयो: कीटा: प्रविष्टा:, कीटानां प्रवेशानन्तरम् अपि आम्रफलानि तु आम्रफलानि एव ननु ? न तानि कदलीफलानि भवन्ति ।

अद्य नमन: कश्चन सफल: अधिवक्ता वर्तते ।

★ ★ ★ ★ ★

नमन: रमणम् उपदिशन् अवदत् - यदि परीक्षायां प्रश्नपत्रम् अतीव कठिनं भवति तर्हि नेत्रे निमिल्य किञ्चित् दीर्घं नि:श्वस्य उच्चै: वदतु यत् - एष: विषय: बहु उत्तम: अस्ति अत: आगामिनि वर्षे पुन: पठिष्याम: ।

★ ★ ★ ★ ★

शिक्षक:- (नमनं प्रति) १५ फलानां नामानि वदतु ।

नमन: - आम्रफलम्, कदलीफलम्, सेव्यफलम्... ।

शिक्षक:- शोभनम्... शोभनम्... । अन्यानि १२ नामानि अपि वदतु ।

नमन: - 'एक दर्जन' परिमितानि कदलीफलानि ।

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**विजितात्मा विनीतात्मा प्रशान्तात्मा सुकीर्तिमान् ।**
**विशुद्धात्मा प्रसन्नात्मा परमात्मा हि मूर्तिमान् ॥**

**तात्पर्यम्** – जितमना:, विनयशील:, शान्तमना:, सम्पादितोत्तमकीर्ति:, शुद्धव्यवहारवान्, सदा हसन्मुखी च य: स्यात् स: साक्षात् देव: इव भवति।

**वित्तं बन्धुर्वय: कर्म विद्या भवती पञ्चमी ।**
**एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥**

**तात्पर्यम्** – धनं, बन्धु:, वय:, कर्म, विद्या – इत्येतानि योग्यतास्थानानि। एतेषु उत्तरोत्तरं श्रेष्ठं भवति।

**वित्ते त्याग: क्षमा शक्तौ दु:खे दैन्यविहीनता ।**
**निर्दम्भता सदाचारे स्वभावोऽयं महात्मनाम् ॥**


**तात्पर्यम्** – धनप्राप्ते दानं, सशक्तोऽपि क्षमादर्शनम्, आपत्तौ अपि दैन्यराहित्यं सदाचारानुष्ठाने दम्भराहित्यञ्च सज्जनानां स्वभाव:।

**विदेशेषु धनं विद्या व्यसनेषु धनं मति: ।**
**परलोके धनं धर्म: शीलं सर्वत्र वै धनम् ॥**

**तात्पर्यम्** – परप्रदेशेषु विद्या एव सम्पत्ति: । कष्टकाले बुद्धि: सम्पद: । परलोकसाधनाय धर्म: एव धनम्। शुद्ध: व्यवहार: सर्वत्र अमूल्यं भवति।

## ज्ञानसरित्

श्यामः पटेलः



**लवणयुक्तजलस्य वनस्पतयः** – "जलमेव जीवनम्। शुद्धं जलमेव जीवनम्। अतिक्षारमुक्तं जलमेव जीवनम्।" नात्र संशयः स्यात्। मनुष्याः स्युः वा पशवः वा पक्षिणः वा वनस्पतयः वा ये केऽपि स्युः। सर्वेषां प्राणधारिणां कृते तृष्णानिवारणाय अतिक्षारयुक्तं जलं न उपयोगि। किन्तु केचन वनस्पतयः तादृशाः सन्ति ये जले लवणस्य मात्राधिक्ये सति विकसन्ति। तादृशाः कच्छ–वनस्पतयः उच्यन्ते। आङ्ग्लभाषया 'मेन्ग्रोव ट्रीझ्' इति। कच्छवनस्पतयः उष्णप्रदेशस्य समुद्रतटे दृश्यन्ते। तत्रत्यं लवणयुक्तं जलं तथा च समुद्रतटीयं वातावरणं कच्छवनस्पतीनां विकासाय योग्यं भवति। यदा समुद्रे पूरवेला भवति तदा तटप्रदेशे जलं भ्रियते तदा तस्मिन् लवणमये जले नैके वनस्पतयः जायन्ते। तेषाम् अर्धं यावत् मूलं जले एव भवति, अपरार्धं यावत् भूमेः बहिः भवति। क्षारयुक्तं जलं पीत्वा एते प्रायः तृणमिव दीर्घाः भवन्ति। समुद्रतटीयं वातवेगं, अल्पप्राणवायुमयं क्षारमयञ्च वातावरणं, पूरवेलायां समुद्रतरङ्गाणां वेगमपि सोढुं शक्नुवन्ति एते वनस्पतयः। भारतस्य पश्चिमबङ्गालराज्ये सुन्दरवनस्य कच्छवनस्पतयः विश्वप्रथिताः सन्ति। तस्मिन् वने तादृशाः वनस्पतयः सम्भवन्ति येषां मूलानि पङ्कात् भूमिं प्रविश्य सुदूरं विस्तरन्ति। प्रायः तेषां स्कन्धः वा प्रकाण्डः न भवति। प्रत्युत मूलानि एव प्रकाण्डस्य कार्यं वहन्ति। तेषां पर्णानि न्यूनानि, मूलानि अधिकानि भवन्ति। "ओक्सिनिया" नामकस्य वनस्पतेः दैर्घ्यं त्रिमीटरमितं भवति किन्तु तस्य सहस्राधिकानि मूलानि भवन्ति। समुद्रवेलाभ्यः तटीयप्रदेशस्य रक्षणाय महदुपयोगिनः भवन्ति एते कच्छवनस्पतयः।

अवतार–वेला – Ebb Tide , पूर–वेला – Flood Tide

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **प्रतिज्ञा** | प्रतिज्ञा | pledge |
| **प्रच्छादनम्** | आच्छादन | covering |
| **दारिका** | पुत्री | daughter |
| **कर्कटः** | केकड़ा | crab |
| **कौमारम्** | कुमारता | Juvenile |
| **कलहः** | झगड़ा | quarell |
| **सम्भ्रमः** | उतावली | haste |
| **त्वचिसारः** | बाँस | bamboo |
| **सुरभिः** | गाय | cow |
| **शरण्यम्** | आश्रय | refuge |
| **सपत्नः** | शत्रु | enemy |
| **दस्युः** | चौर | thief |
| **अश्रेयः** | अपेक्षाकृत जो उत्कृष्ट न हो | inferior |
| **ऐकागारिकः** | शत्रु | enemy |

## किं भवन्तः जानन्ति ?

**१ ) विश्वप्रसिद्धः अरविन्दाश्रमः कुत्र वर्तते ?**
(क) चण्डिगढ़े (ख) बिहारे (ग) लक्षद्वीपे (घ) पोण्डिचेर्याम्

**२ ) प्रसिद्धं दिलवाडामन्दिरं कुत्र वर्तते ?**
(क) कन्याकुमार्याम् (ख) पुष्करे (ग) जम्मूनगरे (घ) माउण्टाबूस्थाने

**३ ) प्रसिद्धं स्थानं 'हर की पौड़ी' कुत्र वर्तते ?**
(क) काश्याम् (ख) प्रयागे (ग) हरिद्वारे (घ) नासिके

**४ ) हरिद्वारं, प्रयागः, नासिकम्, उज्जैनम् इत्येतानि किमर्थं प्रसिद्धानि ?**
(क) पशुमेलायै (ख) पुस्तकमेलायै (ग) कुम्भमेलायै (घ) वाणिज्यमेलायै

**५ ) एतासु का दक्षिणस्य गङ्गा इति कथ्यते ?**
(क) कावेरी (ख) नर्मदा (ग) यमुना (घ) ब्रह्मपुत्र

**६ ) प्रयागे त्रिवेणीतीर्थसङ्गमे गङ्गायमुनाभ्यां सह का नदी वर्तते ?**
(क) कृष्णा (ख) नर्मदा (ग) सरयू (घ) सरस्वती

**७ ) एतासु का नदी यमस्य भगिनी आसीत् ?**
(क) कावेरी (ख) गङ्गा (ग) यमुना (घ) ब्रह्मपुत्र

उत्तराणि – (१) घ (२) घ (३) ग (४) ग (५) क (६) घ (७) ग

## अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY

**Learn Online**

### स्तोत्रपाठः

**( शिवपूजनम्, शिवमहिम्नः स्तोत्रं च )**

**Date** : 04/08/2025 to 08/08/2025
**Day** : Daily
**Time** : 7:00 am to 8:30 am
**Fees** : Rs. 500/-

**Learn Online/Offline**

### सन्धिः

**Date** : 5/08/2025 to 4/09/2025
**Day** : Monday - Wednesday
**Time** : 06:30 pm to 8:00 pm
**Fees** : Rs. 2500/-

**Contact :** Dr. Mihir Upadhyay - (91) 098246 16237

EKLAVYA SANSKRIT ACADEMY

**Learn Online**

### संस्कृतभाषाशिक्षणम्

**First Level**

**Date** : 11/08/2025 to 10/11/2025
**Day** : Mon-Wed-Fri
**Time** : 7:00 am to 8:30 am (IST)
**Fees** : 7000/-

**Third Level**

**Date** : 04/08/2025 to 10/11/2025
**Day** : Mon-Wed-Fri
**Time** : 6:30 pm to 8:00 pm (IST)
**Fees** : 7000/-

**Learn Online/Offline**

### छन्दःपरिचयः

**Date** : 4/8/25 to 3/9/25
**Day** : Mon-Wed
**Time** : 6:30pm to 8:00pm (IST)
**Fees** : 2500/-

**Contact :** Dr. Mihir Upadhyay - (91) 098246 16237

### संस्कृत-साम्प्रतम्

नमस्कारः

यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | | |
|---|---|---|
| वार्षिकं | रू | – 100 |
| द्वैवार्षिकं | रू | – 175 |
| त्रैवार्षिकं | रू | – 250 |
| अङ्कमूल्यं | रू | – 10 |

**प्रियवाचकाः**

- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
||जयतु संस्कृतं जयतु भारतम्||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006